**आकाशीय** त्रि० आकाशस्येदं छ। नाभसे "वायव्यमिदमाकाशीयमिति"। "शब्दबहुलमाकाशीयं तन्मार्दवशौषिरलाघवमिति" च सुश्रुतः। दिगा० यत् आकाश्यमप्यत्र त्रि०।

**आकाशे** अव्य० आ+काश–के। "दूरस्थाभाषणं यत् स्यादशरीरनिवेदनम्। परोक्षान्तरितं वाक्यं तदाकाशे निगद्यते" भरतोक्ते नाटकाङ्गे वाक्यभेदे "कञ्चुकी (दृष्ट्वा आकाशे) विहङ्गिके। अपि श्वश्रूजनपादबन्धनं कृत्वा प्रतिनिवृत्ता भानुमती" (कर्णं दत्त्वा) किं कथयसि आर्या एषा भानुमतीत्यादि" वेणीसं०।

**आकिञ्चन्य** न० अकिञ्चनस्य भावः ष्यञ्। दरिद्रतायाम्।

**आकिदन्ति** पु० १देशभेदे २तद्देशवासिनि च। दामन्या० आयुधजीविसंघार्थे छ। आकिदन्तीयः तद्देशीयायुजीविसंघे। बहुषु छस्य लुक्। आकिदन्तयः।

**आकीर्ण** त्रि० आ+कॄ–क्त। १व्याप्ते, २विक्षिप्ते च। "आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः" रघुः। "स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो" श्यामास्तवः।

**आकीम्** अव्य० आ–कन्–वा० डीमि। १वर्ज्जने २वितर्के च चादिगणे माकीमित्यत्र आकीम् इति पाठान्तरम् "आकीं सूर्य्यस्य रोचनाद्विश्वादेवाँ उषर्बुधः" ऋ० १,१४,९,।

**आकुञ्चन** न० आ+कुचि–ल्युट्। सङ्कोचे, प्रसारितस्य संक्षिप्तत्वसम्पादनसाधने क्रियाभेदे "आकुञ्चनन्तु सत्स्वेवावयवानामारम्भकसंयोगेषु परस्परमवयवानामनारम्भकसंयोगोत्पादकं वस्त्राद्यवयविकौटिल्योत्पादकं कर्म्म, यतो भवति सङ्कुचति पद्मं सङ्कुचति वस्त्रं सङ्कुचति चर्म्मेति प्रत्ययः" वै० सू० उप०। स च कर्म्मभेदः कर्म्म च पञ्चविधम्। "उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्म्माणि" वै० सू०। अत्र च उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्वानि कर्म्मत्वसाक्षाद्व्याप्याः पञ्च जातयः" वै० सू० उ०। कर्म्म च "एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्म्मलक्षणम्" वै० सू० उक्तलक्षणकम्। विवृतञ्च उप० "एकमेव द्रव्यमाश्रयो यस्य तदेकद्रव्यं न विद्यते गुणोऽस्मिन्नित्यगुणम्" संयोगविभागेष्वनपेक्षकारणमिति स्वोत्पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षमित्यर्थः तेन समवायिकारणापेक्षायां पूर्व्वसंयोगाभावापेक्षयाञ्च नासिद्धत्वम्। स्वोत्पत्त्यनन्तरोत्पत्तिकानपेक्षत्वं वा विवक्षितम् पूर्व्वसंयोगध्वंसस्यापि स्वोत्पत्त्यनन्तरानुत्पत्तिकत्वेन अभावत्वेन तस्याद्यक्षणे सम्बन्धाभावात् तेन नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्म्मत्वम्। प्रचलतीति प्रत्ययासाधारणकारणतावच्छेदकजातिमत्त्वं वा गुणान्यनिर्गुणमात्रवृत्तिजातिमत्त्वं वा स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिविभागकारणतावच्छेदकजातिमत्त्वं वा" "उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा। प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च" भाषा० "सन्धिगतः पीड्यमानो न प्रवर्त्तेत आकुञ्चनप्रसारणोन्नमनविनमनप्रधावनोत्कासनप्रवाहणैस्च स्रवति" "प्रसारणाकुञ्चनबन्धनपीड़नैर्भृशमुपचरेत्" अनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः" इति च सुश्रुतः।

**आकुञ्चित** त्रि० आ+कुचि–क्त। १आभुग्ने २सङ्कोचिते च। "नतांसमाकुञ्चितसव्यपादम्" भट्टिः।

**आकुल** त्रि० आ+कुल–क। व्यग्रे। "तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्" गीता "त्रासाकुलः परिपतन् परितो निकेतान्यूर्म्मिः" "अभिचोद्यं प्रतिश्रुराशीत् कार्य्यद्वयाकुलः" इति च माघः। निराकुलः पर्य्याकुलः व्याकुलः समाकुलः। आकुलत्वञ्च मनश्चाञ्चल्यसम्पादकमानसावस्थाभेदः स्वक्रियाऽसामर्थ्यञ्च। कृत्यर्थे णिच् आकुलयति अभूततद्भावे च्वि क्राद्यनुप्रयोगः आकुलीभूतः आकुलीकृतः "द्रविणं परिमितमविकव्ययिनं जनमाकुलीकुरुते"

**आकुलाकुल** त्रि० आकुल+प्रकारे द्वित्वम्। १आकुलप्रकारे २अत्यन्ताकुले च।

**आकुलि** पु० आ+कुल–इन्। व्याकुलत्वे।

**आकुलित** त्रि० आ+कुल–क्त। व्याकुलीभूते आकुल+कृत्यर्थे णिच् कर्म्मणि क्त। आकुलीकृते "मार्गाचलव्यतिकराकुलितेव सिन्धुः" कुमा०।

**आकुलीकृत** त्रि० अनाकुलः आकुलः कृतः आकुल+च्वि–कृ कर्म्मणि क्त व्याकुलतां प्रापिते। [भूते।

**आकुलीभूत** त्रि० आकुल+च्वि–भू–क्त। स्वयं तथा-

**आकूत** न० आ+कू–भावे क्त। आशये अभिप्राये। "स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकां वृत्तिम्" सां० का० यथा शार्ङ्गिकादयः–"कृतसङ्केताः परास्कन्दने प्रवृत्ताः तत्रान्यतमस्याकूतमवगम्यान्यतमः प्रवर्त्तते तथा अन्यतमस्य करणस्याकूतात् स्वकार्य्यकरणाभिमुखादन्यतमं करणं प्रवर्त्तते" इति सां० कौ० 'इतीरिताकूतमनीलवाजिनः" किरा०। [वेदनाकूणितत्रिभागेण" काद०।

**आकूणित** आ+कूण–क्त। ईषत्सङ्कुचिते। "मदनशरशल्य

**आकूति** स्त्री आ+कू–भावे क्तिन्। अभिप्राये। "आकूतीनाञ्च चित्तीनां प्रवर्त्तक! नमामि ते" भा० व० २६२